# Sutaproktam Kashimahatmyaphalam

# सूतप्रोक्तं काशीमाहात्म्यफलम्

## Document Information

Text title : Sutaproktam Kashimahatmyaphalam

File name : sUtaproktaMkAshImAhAtmyaphalam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 12 | 483-496||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# सूतप्रोक्तं काशीमाहात्म्यफलम्

सूत उवाच -
काशीमाहात्म्य पीयूषवर्षधारा परिप्लुताम् ।
संश्लिष्य गौरीं विश्वेशः प्राषानन्दं जगत्पिता ॥ ४८३॥

ततो वृषेशमारुह्य काशीदर्शनलोलुपः ।
कैलासादगमत्काशीमुमया सह सर्वगः ॥ ४८४॥

भवद्भिरपि विप्रेन्द्राः काशी विश्वेशसंश्रया ।
सम्यगाश्रयणीयैव मोक्षार्थिभिरहर्निशम् ॥ ४८५॥

इदं माहात्म्यममलं यः शृणोति पठिष्यति ।
स सर्वपापनिर्मुक्तः शिवलोकं गमिष्यति ॥ ४८६॥

इदं माहात्म्यममलं लिखित्वा पुस्तके यदि ।
यः पूजयेदतिप्रीत्या तस्याघं सम्प्रणश्यति ॥ ४८७॥

इदमेव हि माहात्म्यं यत्र कुत्रापि यः पठेत् ।
तत्रैव काशीविश्वेशो निवसेन्नात्र संशयः ॥ ४८८॥

इदं माहात्म्यमनिशमिन्दाद्यैरमरैर्मुदा ।
श्रूयते सुखदं प्रीत्या सर्वपापौघनाशकम् ॥ ४८९॥

इदमेवहि माहात्म्यं ब्रह्मा शिवपरायणः ।
ब्रह्मलोके सदा सम्यक् पठति प्रीतमानसः ॥ ४९०॥

विष्णुरप्यनिशं भक्त्या शिवलिङ्गार्चनप्रियः ।
पठति प्रीतहृदयो माहात्म्यमिदमादरात् ॥ ४९१॥

येनेदं पठ्यते प्रीत्या माहात्म्यमति शोभनम् ।
तेन प्राप्ता मुक्ति कान्ता सत्यं सत्यं न संशयः ॥ ४९२॥

देशान्तरेऽपि वा स्थित्वा माहात्म्यमिदमुत्तमम् ।

यः पठिष्यति पुण्यात्मा स काश्यां संस्थितोभवेत् ॥ ४९३॥

अशक्तैः पङ्गुभिर्वृद्धैरिदं माहात्म्यमन्वहम् ।
काश्यन्यदेशे स्थित्वाऽपि पठनीयं प्रयत्नतः ॥ ४९४॥

ये जन्मदुःखादि विनाशकं सदा शृण्वन्ति माहात्म्यमिदं मनोहरम् ।
ते शङ्करस्यातिहिताः शिवार्चकाः शिवैकदेवाः शिवसम्मताः सदा ॥ ४९५॥

संसार दावानलदह्यमानैः काशीसुधाब्ति सुरवृन्दसेव्यः ।
सेव्यो हि सर्वैरपि सर्वदायं पापापनुत्यै जनदुःखशान्त्यै ॥ ४९६॥

॥ इति शिवरहस्यान्तर्गते सूतप्रोक्तं काशीमाहात्म्यफलं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । उग्राख्यः सप्तमांशः । अध्यायः १२ । ४८३-४९६ ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 12 . 483-496..

Notes:
ŚivaRahasyam saptāṃśaḥ शिवरहस्यं सप्तांशः has descriptions about and the merits of pilgrimage to Kaśī काशी and the several TīrthaKṣetra तीर्थक्षेत्र located there. These constitute Kaśīmāhātmyam काशीमाहात्म्यम्. Sūta सूत summarizes the merits of listening to and reading of the text of Kaśīmāhātmyam काशीमाहात्म्यम् that was narrated by Śiva शिव to Pārvatī पार्वती.

Proofread by Ruma Dewan

*Sutaproktam Kashimahatmyaphalam*

pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*